सुकुमाराङ्ग - having very delicate limbs (सुकुमार *very tender*-अङ्ग *limb*)
सुलोचन - having fine eyes (सु *good*-लोचन *eye*)

आक्षिपन्तीमिव प्रभां शशिनः स्वेन तेजसा - *As if surpassing the light of the moon by her own splendor…*
ववृधे - 3s perf. Ā. of √वृध्
तस्य दृष्ट्वैव ववृधे कामस्तां चारुहासिनीम् - Join तस्य with कामः and दृष्ट्व with तां चारुहासिनीम्
चिकीर्षमाण - desiderative Ā. participle of √कृ. *Wishing to do the truth…*
धारयामास - periphrastic perf. caus. of √धृ
संभ्रान्ताः - f. pl. participle of सम्-√भ्रम्
समुत्पेतुः - 3p perf. of सम्-उत्-√पद्

प्रशशंसुश्च सुप्रीता नलं ता विस्मयान्विताः।
न चैनमभ्यभाषन्त मनोभिस्त्वभ्यपूजयन्॥३-१६॥
अहो रूपमहो कान्तिरहो धैर्यं महात्मनः।
को ऽयं देवो नु यक्षो नु गन्धर्वो नु भविष्यति॥३-१७॥
न तास् शक्नुवन्ति स्म व्याहर्तुमपि किंचन।
तेजसा धर्षिताः तस्य लज्जावत्यो वराङ्गनाः॥३-१८॥

अभि-√पूज् - to honor, reverence greatly
अहो - *ind.* Oh!
एनम् - *enclitic m. acc. Pronoun*
कान्ति - *f.* loveliness; beauty; splendor
धैर्य - *n.* firmness; gravity; fortitude
मनस् - *n.* mind
लज्जावत् - ashamed; embarrassed; bashful (लज्जा *shame*-वत्)
वराङ्गना - *f.* a beautiful woman (वर *choicest*-अङ्गना *woman with well-rounded limbs*)
विस्मयान्वित - filled with astonishment or wonder (विस्मय *wonder*-न्वित)
सुप्रीत - very delighted (सु *well*-प्रीत *pleased*)

प्रशशंसुः - 3p perf. of प्र-√शंस्
न चैनम् - Uf. न च एनम्
अभ्यभाषन्त - 3p imp. Ā. of अभि-√भाष्
मनोभिस्त्वभ्यपूजयन् - Uf. मनोभिः तु अभ्यपूजयन्
अभ्यपूजयन् - 3p imp. of अभि-√पूज्
भविष्यति - 3s future of √भू. Future tense here marks conjecture, presumption: *What god, yaksha, gandharva might this now be?*
शक्नुवन्ति स्म - 3p of √शक्; स्म past tense
व्याहर्तुम् - Infinitive of व्य्-आ-√हृ
लज्जावत्यः - nom. f. pl. of लज्जावत्

अथैनं स्मयमानं तु स्मितपूर्वाभिभाषिणी।
दमयन्ती नलं वीरमभ्यभाषत विस्मिता॥३-१९॥
कस्त्वं सर्वानवद्याङ्ग मम हृच्छयवर्धन।
प्राप्तो ऽस्यमरवद्वीर ज्ञातुमिच्छामि ते ऽनघ॥३-२०॥
कथमागमनं चेह कथं चासि न लक्षितः।
सुरक्षितं हि मे वेश्म राजा चैवोग्रशासनः॥३-२१॥

अनघ - faultless; sinless (अन् *without*-अघ *impurity*)
अमरवत् - like an immortal; like a god (अमर *immortal*-वत् *like*)
आगमन - *n.* coming (आ *towards*-गमन *going*)
इह - here
उग्रशासन - severe in command; strict in orders (उग्र *mighty; violent*-शासन *punisher*)
√ज्ञा - to know
√लक्ष् - to perceive; observe
वेश्म - var. वेश्मन्
सर्वानवद्याङ्ग - having an entirely faultless body (सर्व *all*-अनवद्याङ्ग *not-unpraiseworthy-body*)
√स्मि - to smile
स्मितपूर्वाभिभाषिन् - addressing with a smile (स्मित *smile*-पूर्वा *preceding*-अभिभाषिन् *addressing*)
हृच्छयवर्धन - augmenting love (हृच्छय *love*-वर्धन *increasing*)

अभ्यभाषत - 3s imp. of अभि-√भाष्
अथैनं स्मयमानं तु स्मितपूर्वाभिभाषिणी - *Then to him smiling, Damayanti addressing with a smile, to the hero Nala spoke, amazed...*
प्राप्तो ऽस्यमरवत् - PPP प्र-√आप् with 2s copula असि forms periphrastic past. *You are come like a god*... ie, invisibly.
ज्ञातुम् - Infinitive of √ज्ञा. With gen. ते - *get acquainted with you...*
चेह - Uf. च इह
लक्षितः - PPP of √लक्ष्
चैवोग्रशासनः - Uf. च एव उग्रशासनः

एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह।
नलं मां विद्धि कल्याणि देवदूतमिहागतम्॥३-२२॥
देवास्त्वां प्राप्तुमिच्छन्ति शक्रो ऽग्निर्वरुणो यमः।
तेषामन्यतमं देवं पतिं वरय शोभने॥३-२३॥
तेषामेव प्रभावेन प्रविष्टो ऽहमलक्षितः।
प्रविशन्तं न मां कश्चिदपश्यन्नाप्यवारत्॥३-२४॥
एतदर्थमहं भद्रे प्रेषितः सुरसत्तमैः।
एतच्छ्रुत्वा शुभे बुद्धिं प्रकुरुष्व यथेच्छसि॥३-२५॥

अलक्षित - unseen (अ *not*-लक्षित *perceived*)
कल्याण - beautiful; noble
प्र-√कृ - to make; to accomplish
प्रति-√वच् - to announce
प्रभाव - *m.* might; supernatural power
बुद्धि - *f.* reason; intelligence
भद्र - blessed; gracious; fair
√वृ - to ward off
शुभ - splendid; bright; auspicious
शोभन - brilliant; splendid; beautiful
सुरसत्तम - the best of the gods (सुर *deity*-सत्तम *very good; chief*)

प्रत्युवाच - 3s perf. of प्रति-√वच्
विद्धि - 2s imp. of √विद्
कल्याणि - f. vocative of कल्याण
देवदूतमिहागतम् - Uf. देवदूतम् इह आगतम्. आगत - PPP of आ-√गम्. *Know, noble lady, that I am Nala, come as a messenger of the gods..*
तेषामन्यतमं देवं पतिं - *...any of the gods as your husband...*
वरय - 2s imp. of √वृ
प्रविष्ट - PPP of प्र-√विश्
प्रविशन्तं - m. acc. participle of प्र-√विश्
कश्चिदपश्यन्नाप्यवारत् - Uf. कश्चित् अपश्यत् न् अपि अवारत्
अपश्यत् - 3s imp. of √दृश् (root supplanted by √पश्)
अवारत् - 3s imp. of √वृ
भद्रे - f. voc. of भद्र
प्रेषित - PPP of प्र-√इष्
एतच्छ्रुत्वा - Uf. एतत् श्रुत्वा
प्रकुरुष्व - 2p imp. Ā. of प्र-√कृ. *Make up your mind...*
यथेच्छसि - Uf. यथ इच्छसि. *...as you wish.*

बृहदश्व उवाच।
सा नमस्कृत्य देवेभ्यः प्रहस्य नलमब्रवीत्।
प्रणयस्व यथाश्रद्धं राजन्किं करवाणि ते॥३-५३-१॥
अहं चैव हि यच्चान्यन्ममास्ति वसु किंचन।
तत्सर्वं तव विश्रब्धं कुरु प्रणयमीश्वर॥३-५३-२॥
हंसानां वचनं यत्तु तन्मां दहति पार्थिव।
त्वत्कृते हि मया वीर राजानः संनिपातिताः॥३-५३-३॥

त्वत्कृत - *ind.* for your sake
√दह् - to burn
नमस् - *n.* bow; reverential salutation
प्रणय - *m.* manifestation of one's affection
प्र-√णी - to lead; to manifest affection
प्र-√हस् - to burst into laughter
यथाश्रद्धम् - *ind.* in all faith; confidently (यथ *like*-श्रद्धम् *faithful*)
वचन - *n.* the act of speaking; utterance
वसु - excellent; good; beneficent
विश्रब्धम् - *ind.* confidently; without reserve

नमस्कृत्य - Uf. नमस्-gerund of √कृ
प्रहस्य - gerund of प्र-√हस्
प्रणयस्व - 2s imp. Ā. of प्र-√णी
करवाणि - 1s imp. of √कृ. 1s imp. expresses permission: *What may I do for you?*
यच्चान्यन्ममास्ति - Uf. यत् च अन्यत् मम अस्ति. *Both I and whatever other good I have...*
सर्वं तत्तव विश्रब्धं / कुरु प्रणयमीश्वर - Caesura marks a new clause. *All that is yours; make manifest your affection* [in return]*, lord.*
तन्मां - Uf. तत् माम्
त्वत् - 2s abl. pronoun.
संनिपातिता - caus. nom. m. pl. PPP सं-नि-√पत्, as indicated by the long A-vowel. Takes the meaning of "to cause to gather." *For your sake by me, hero, are kings gathered.*

यदि त्वं भजमानां मां प्रत्याख्यास्यसि मानद।
विषमग्निं जलं रज्जुमास्थास्ये तव कारणात्॥३-५३-४॥
एवमुक्तस्तु वैदर्भ्या नलस्तां प्रत्युवाच ह।
तिष्ठत्सु लोकपालेषु कथं मानुषमिच्छसि॥३-५३-५॥
येषामहं लोककृतामीश्वराणां महात्मनाम्।
न पादरजसा तुल्यो मनस्ते तेषु वर्तताम्॥३-५३-६॥

अग्नि - *m.* fire
आ-√स्था - to ascend; to carry out
कारण - *n.* cause
जल - *n.* water
तुल्य - equal
पादरजस् - *n.* dust of the feet (पाद *foot*-रजस् *dirt*)
प्रत्य्-आ-√ख्या - to reject
मानद - honor-giver; respectful term of address (मान *conceit*-द *giver*)
√भज् - to serve; revere; adore; prefer
रज्जु - *f.* rope
लोककृत् - *m.* creator of the world (लोक *world*-कृत् *maker*)
विष - *n.* poison
√वृत् - to turn; to be; to happen

भजमानां - f. s. acc. Ā. participle of √भज्
प्रत्याख्यास्यसि - 2s future of प्रत्य्-आ-√ख्या. Conjecture. *If you should reject me...*
आस्थास्ये - 1s Ā. future of आ-√स्था.
तव कारणात् - Ablative of cause. *Because of you*.
प्रत्युवाच - 3s perf. of प्रति-√वच्
तिष्ठत्सु लोकपालेषु - Locative absolute. तिष्ठत्सु - m. loc. pl. participle of √स्था. *The guardians of the world being present*...
न पादरजसा तुल्यो - Idiomatic phrase. *[I am] not equal to the dust on their feet*.
वर्तताम् - 3s. Ā. imperative of √वृत्. *Let your mind be on them*.

विप्रियं ह्याचरन्मर्त्यो देवानां मृत्युमृच्छति।
त्राहि मामनवद्याङ्गि वरयस्व सुरोत्तमान्॥३-५३-७॥
विरजांसि च वासांसि दिव्याश्चित्राः स्रजस्तथा।
भूषणानि च मुख्यानि देवान्प्राप्य तु भुङ्क्ष्व वै॥३-५३-८॥
य इमां पृथिवीं कृत्स्नां संक्षिप्य ग्रसते पुनः।
हुताशमीशं देवानां का तं न वरयेत्पतिम्॥३-५३-९॥

आ-√चर् - to approach; to undertake; to perform
ईश - *m.* lord; master; ruler
√ऋ - to obtain; to meet
√ग्रस् - to seize with the mouth; to devour
√त्रै - to protect; to rescue
√भुज् - to enjoy
भूषण - *n.* ornament
मर्त्य - mortal
मुख्य - at the front; most excellent
√मृ - to die
वासस् - *n.* clothes; dress; garment
विप्रिय - *n.* transgression
विरजस् - free from dust
सं-√क्षिप् - to heap up; to condense
सुरोत्तम - *m.* chief of the gods (सुर *deity*-उत्तम *best*)
स्रज - garland
हुताश - *m.* oblation-eater (हुत *oblation*-आश *eater*)

ह्याचरन् - Uf. हि आचरन्. आचरन् - m. nom. participle of आ-√चर्.
देवानां - limits विप्रियं
मृत्युमृच्छति - Uf. मृत्युम् - infinitive of √मृ-ऋर्च्छति - 3s of √ऋ
त्राहि - 2s imperative of √त्रै
वरयस्व - 2s Ā. imperative of √वृ
विरजांसि च वासांसि - neuter plural
प्राप्य - Gerund प्र-√आप्. *Having obtained the gods...*
भुङ्क्ष्व - 2s Ā. imperative of √भुज्
संक्षिप्य - Gerund सं-√क्षिप्
वरयेत् - 3s optative of √वृ
का तं न वरयेत्पतिम् - f. nom. interrogative pronoun; predicate acc. adjective. *Who is she who would not choose him as a husband?* Agni is meant here.

यस्य दण्डभयात्सर्वे भूतग्रामाः समागताः।
धर्ममेवानुरुध्यन्ति का तं न वरयेत्पतिम्॥३-५३-१०॥
धर्मात्मानं महात्मानं दैत्यदानवमर्दनम्।
महेनद्रं सर्वदेवानां का तं न वरयेत्पतिम्॥३-५३-११॥
क्रियतामविशङ्केन मनसा यदि मन्यसे।
वरणं लोकपालानां सुहृद्वाक्यामिदं शृणु॥३-५३-१२॥

अनु-√रुध् - to adhere to
अविशङ्क - *in instr.* without doubts or hesitation (अ *no*-विशङ्क *doubt*)
दण्डभय - *n.* dread of punishment (दण्ड *rod*-भय *fear*)
दैत्यदानवमर्दन - *m.* crusher of Daitya and Danava; epithet of Indra (दैत्य-दानव-मर्दन *crushing*)
धर्मात्मन् - righteous (धर्म *dharma*-आत्मन् *soul*)
भूतग्राम - *m.* community of creatures (भूत *existing*-ग्राम *village*)
वरण - *n.* the act of choosing
सुहृद्वाक्य - *n.* the speech of a friend (सुहृद् *good-heart*-वाक्य *speech*)

यस्य दण्डभयात्सर्वे - यस्य limits only दण्डभयात्, not the whole compound. Yama is meant here.
समागत - PPP of सम्-आ-√गम्
धर्ममेवानुरुध्यन्ति - Uf. धर्मम् एव अनुरुध्यन्ति. अनुरुध्यन्ति - 3p of अनु-√रुध्.
क्रियताम् - 3s passive imperative of √कृ. Takes वरणं as subject. *Let a choice be made...*
मन्यसे - 2s Ā. of √मन्
शृणु - 2s imperative of √श्रु. Note how caesura marks a new clause.

नैषधेनैवमुक्ता सा दमयन्ती वचो ऽब्रवीत्।
समाप्लुताभ्यां नेत्राभ्यां शोकजेनाथ वारिणा॥४-१३॥
देवेभ्यो अहं नमस्कृत्य सर्वेभ्यः पृथिवीपते।
वृणे त्वामेव भर्तारं सत्यमेतद्ब्रवीमि ते॥४-१४॥
तामुवाच ततो राजा वेपमानां कृताञ्जलिम्।
दौत्येनागत्य कल्याणि कथं स्वार्थमिहोत्सहे॥४-१५॥

दौत्य - *n.* the state or function of a messenger
नेत्र - leader; *f.* eye; guiding organ
पृथिवीपति - *m.* prince; king (पृथिवी *earth*-पति *lord*)
भर्तृ - *m.* husband
√विप् - to tremble; to shiver
वारि - *n.* water
शोकज - produced by sorrow (शोक *sorrow*-ज *born*)
सम्-आ-√प्लु - to overflow
स्वार्थ - *m.* self-interest (स्व *self*-अर्थ *goal*)

समाप्लुताभ्यां नेत्राभ्यां - Instrumental dual. समाप्लुताभ्यां - PPP of सम्-आ-√प्लु
वारिणा - inst. s.
देवेभ्यो सर्वेभ्यः - Dative pl.
नमस्कृत्य - Gerund √कृ. *Having done homage to all the gods...*
वृणे त्वामेव - Read एव here as *only*. वृणे - 1s Ā. of √वृ. *I choose only you as a husband*.
वेपमानां - f. acc. s. Ā. participle of √विप्
कृताञ्जलिम् - here feminine
आगत्य - Gerund of आ-√गम्. *Having come as a messenger...*
स्वार्थमिहोत्सहे - Uf. स्वार्थम् इह उत्सहे. उत्सहे - 1s Ā. of उत्-√सह्. *How shall I strive for my self-interest?*

कथं ह्यहं प्रतिश्रुत्य देवतानां विशेषतः।
परार्थे यत्नमारभ्य कथं स्वार्थमिहोत्सहे॥४-१६॥
एष धर्मो यदि स्वार्थो ममापि भविता ततः।
एवं स्वार्थं करिष्यामि तथा भद्रे विधीयताम्॥४-१७॥
ततो बाष्पाकुलां वाचं दमयन्ती शुचिस्मिता।
प्रत्याहरन्ती शनकैर्नलं राजानमब्रवीत्॥४-१८॥

आ-√रभ् - to take hold; to undertake
प्रति-√श्रु - to listen; to promise
प्रत्य्-आ-√हृ - to draw back; to utter
बाष्पाकुल - dimmed by tears (बाष्प *tear*-आकुल *confounded*)
वि-√धा - to distribute; to arrange
विशेषतस् - *ind.* especially (विशेष *particular characteristic*-तस्)
शनकैस् - *ind.* quietly; gently (dim. of शनैस्)
शुचिस्मित - brightly smiling (शुचि *glowing*-स्मित *smiling*)

ह्यहं - Uf. हि अहम्
प्रतिश्रुत्य - Gerund of प्रति-√श्रु
देवतानां - Gen. pl. indirect object of प्रतिश्रुत्य. *Having promised to the gods...*
परार्थे - Here *others' interest*.
यत्नमारभ्य - Idiomatic usage. *Having undertaken an effort...* आरभ्य - Gerund of आ-√रभ्
भविता - Periphrastic future of √भू
करिष्यामि - 1s future of √कृ
एष धर्मो - Uf. एषस् धर्मः [अस्ति]. Forms a clause.
विधीयताम् - 3s passive imperative of वि-√धा. *So let it be done*.
प्रत्याहरन्ती - f. nom. participle of प्रत्य्-आ-√हृ.

उपायो ऽयं मया दृष्टो निरपायो नरेश्वर।
येन दोषो न भविता तव राजन्कथं चन॥४-१९॥
त्वं चैव हि नरश्रेष्ट देवाश्चेन्द्रपुरोगमाः।
आयन्तु सहिताः सर्वे मम यत्र स्वयंवरः॥४-२०॥
ततो अहं लोकपालानां संनिधौ त्वां नरेश्वर।
वरयिष्ये नरव्याघ्र नैवं दोषो भविष्यति॥४-२१॥

आ-√या - to come near; to arrive
इन्द्रपुरोगम - having Indra as leader (इन्द्र *Indra*-पुरोगम *going-before*)
उपाय - *m.* approach; means; stratagem
दोष - *m.* fault; transgression
नरव्याघ्र - *m.* "man-tiger"; eminent, illustrious man (नर *man*-व्याघ्र *tiger*)
नरश्रेष्ट - *m.* best of men (नर *man*-श्रेष्ट *best*)
निरपाय - imperishable; infallible (निर् *without*-अपाय *departure; death*)
संनिधि - *m.* nearness; *in loc.* in the presence of...
सहित - united

मया दृष्टो - Passive construction. *By me is seen...* दृष्ट - PPP of √दृश्
भविता - Periphrastic future of √भू
येन दोषो न भविता तव - Possessive construction. *You will have no fault...*
कथं चन - *...in any way*.
त्वं चैव [...] देवाश्चेन्द्रपुरोगमाः - Uf. त्वं च एव देवाः च इन्द्रपुरोगमाः
आयन्तु - 3p imperative of आ-√या. *Let you and the gods with Indra as leader come...*
मम यत्र स्वयंवरः - Dependent clause. *...where my Svayamvara is.*
संनिधौ - Loc. s. of संनिधि. Takes लोकपालानां as object. *In the presence of the protectors of the world...*
वरयिष्ये - 1s future Ā. of √वृ
नैवं - Uf. न एवम्

एवमुक्तस्तु वैदर्भ्या नलो राजा विशां पते।
आजगाम पुनस्तत्र यत्र देवाः समागताः॥४-२२॥
तमपश्यंस्तथायान्तं लोकपाला महेश्वराः।
दृष्ट्वा चैनं ततो ऽपृच्छन्वृत्तान्तं सर्वमेव तम्॥४-२३॥
कच्चिद्दृष्टा त्वया राजन्दमयन्ती शुचिस्मिता।
किमब्रवीच्च नः सर्वान्वद भूमिपते ऽनघ॥४-२४॥

कच्चिद् - *particle of interrogation*
भूमिपति - *m.* “earth-lord”; prince; king (भूमि *ground*-पति *lord*)
वृत्तान्त - *m.* incident; event; doings

वैदर्भ्या - Inst. s. *By Damanti…*
विशां पते - Vocative. Yudhishthira.
आजगाम - 3s perfect of आ-√गम्
तत्र यत्र देवाः समागताः - Dependent clause. *There, where the gods were gathered…*
तमपश्यंस्तथायान्तं - Uf. तम् अपश्यन् तथा आयान्तम्. अपश्यन् - 3p imp of √दृश्. आयान्तम् - m. s. acc. participle of आ-√या. *Him they likewise saw coming…*
चैनं - Uf. च एनम्
अपृच्छन्वृत्तान्तं - Uf. अपृच्चन् वृत्तान्तम्. अपृच्छन् - 3p imp. of √प्रछ्. √प्रछ् takes two accusative objects: *They asked him all the story…*
कच्चिद्दृष्टा त्वया - Uf. कच्चिद् दृष्टा त्वया. *Was she seen by you…*
किमब्रवीच्च - Uf. किम् अब्रवीत् च. *…And what did she say…*
नः - Enclitic 1p oblique pronoun.
सर्वान्वद - Uf. सर्वान् वद. वद - 2s imperative of √वद्. *Tell us all…*

नल उवाच।
भवद्भिरहमादिष्टो दमयन्त्या निवेशनम्।
प्रविष्टः सुमहाकक्षं दण्डिभिः स्थविरैर्वृतम्॥४-२५॥
प्रविशन्तं च मां तत्र न कश्चिद्दृष्टवान्नरः।
ऋते तां पार्थिवसुतां भवतामेव तेजसा॥४-२६॥
सख्यश्चास्या मया दृष्टास्ताभिश्चाप्युपलक्षितः।
विस्मिताश्चाभवन्सर्वाः दृष्ट्वा मां विबुधेश्वराः॥४-२७॥

आ-√दिश् - to order; direct; command
उप-√लक्ष् - to look at; behold; perceive
ऋते - except; besides (with abl. or acc.)
दण्ड - *m.* rod; cudgel; club
पार्थिवसुता - *f.* king's daughter (पार्थिव *king*-सुता *daughter*)
विबुधेश्वर - *m.* lord of the gods (विबुध *wiseman*-ईश्वर *god*)
सुमहाकक्ष - very high-walled (सु *well*-महा *great*-कक्षा *wall*)
स्थविर - firm; full-grown; *m.* old man

भवद्भिः - Inst. pl. of भवत्. *Ordered by you...*
आदिष्ट - PPP of आ-√दिश्
प्रविष्ट - PPP of प्र-√विश्
स्थविरैर्वृतम् - Uf. स्थविरैः वृतम्. *Surrounded by old men with cudgels...*
प्रविशन्तं - m. s. acc. participle of प्र-√विश्.
कश्चिद्दृष्टवान्नरः - Uf. कश्चित् दृष्टवान् नरः. दृष्टवत् - perfect active participle of √दृश्. *There was not any man having seen me...*
भवताम् - gen. pl. of भवत्
तेजसा - Elsewhere means *splendor*; here means *power*.
सख्यश्चास्या - Uf. सख्यः च अस्याः. सख्यः - nom. pl. of सखी. अस्याः - f. gen. s. pronoun.
मया दृष्टास्ताभिश्चाप्युपलक्षितः - Uf. मया दृष्टाः ताभिः च अपि उपलक्षितः. *...were seen by me, and by them I too was perceived*.
अभवन् - 3p imp. of √भू

वर्ण्यमानेषु च मया भवत्सु रुचिराननना।
मामेव गतसंकल्पा वृणीते सा सुरोत्तमाः॥४-२८॥
अब्रवीच्चैव मां बाला आयान्तु महिताः सुराः।
त्वया सह नरव्याघ्र मम यत्र स्वयंवरः॥४-२९॥
तेषामहं संनिधौ त्वां वरयिष्यामि नैषध।
एवं तव महाबाहो दोषो न भवितेति ह॥४-३०॥
एतावदेव विबुधा यथावृत्तमुदाहृतम्।
मया शेषे प्रमाणं तु भवन्तस्त्रिदशेश्वराः॥४-३१॥

उद्-आ-√हृ - to relate; to tell; to illustrate
एतावत् - *ind.* so much; so far; thus
गतसंकल्प - whose purpose or will is momentarily gone (गत *gone*-संकल्प *purpose*)
त्रिदशेश्वर - Indra, Agni, Varuna, and Yama (त्रिदश *thirty*-ईश्वर *god*)
प्रमाण - *n.* measure; authority
महित - honored
रुचिरानन - fair-faced (रुचिर *splendid*-आनन *face*)
√वर्णय - to describe (*denominal* वर्ण)
विबुध - very wise; god
शेष - *m.* remainder; the rest

वर्ण्यमानेषु च मया भवत्सु - Loc. absolute. वर्ण्यमानेषु - m. loc. pl. Ā. participle of वर्णय. भवत्सु - loc. pl. of भवत्. *While your excellencies were being described by me...*
वृणीते - 3s Ā. of √वृ
अब्रवीच्चैव - Uf. अब्रवीत् च एव
आयान्तु - 3p imperative of आ-√या. Nala repeats Damayanti's plan in direct speech.
त्वया सह नरव्याघ्र - त्वया refers to Nala: he is here repeating Damayanti's words.
तेषामहं संनिधौ - *In there presence, I...*
वरयिष्यामि - 1s future of √वृ
महाबाहो - voc. of महाबाहु
भवितेति - Uf. भविता इति
यथावृत्तमुदाहृतम् - Uf. यथा वृत्तम् उदाहृतम्. वृत्तम् - PPP of √वृत्. उदाहृतम् - PPP of उद्-आ-√हृ. *Thus it is told as it happened.*
शेषे प्रमाणं तु भवन्तस्त्रिदशेश्वराः - *As for the rest, you are an authority*; ie, *the rest is up to you*. Uf. भवन्तः त्रिदशेश्वराः

बृहदश्व उवाच।
अथ काले शुभे प्राप्ते तिथौ पुण्ये क्षणे तथा।
आजुहाव महीपालान्भीमो राजा स्वयंवरे॥५-१॥
तच्छ्रुत्वा पृथिवीपालाः सर्वे हृच्छयपीडिताः।
त्वरिताः समुपाजग्मुर्दमयन्तीमभीप्सवः॥५-२॥
कनकस्तम्भरुचिरं तोरणेन विराजितम्।
विविशुस्ते नृपा रङ्गं महासिंहा इवाचलम्॥५-३॥

अचल - immovable; *m.* mountain
अभ्य्-√आप् - to reach; to get; to obtain
आ-√ह्वे - to call near; to summon
कनकस्तम्भरुचिर - shining with columns of gold (कनक *gold*-स्तम्भ *column*-रुचिर *radiant*)
तिथि - *mf.* lunar day
तोरण - *n.* arch; arched doorway
त्वरित - hasty; quick
पुण्य - auspicious; propitious; meritorious
महासिंह - *m.* great lion (महा *great*-सिंह *lion*)
रङ्ग - *m.* place of assembly; stage
विराजित - eminent; illustrious; glorious
सम्-उप-√गम् - to go together towards
हृच्छयपीडित - lovesick; tormented by love (हृच्छय *love*-पीडित *afflicted*)

काले शुभे प्राप्ते तिथौ पुण्ये क्षणे - Loc. absolute with प्राप्ते. *When an auspicious time and lunar day had been reached...*
आजुहाव - 3s perf. of आ-√ह्वे
समुपाजग्मुः - 3p perf. of सम्-उप-√गम्
अभीप्सवः - m. nom. pl. desiderative participle of अभ्य्-√आप्. *...desiring to obtain her.*
विविशुसः - 3p perf. of √विश्
विविशुस्ते नृपा रङ्गं महासिंहा इवाचलम् - Supply the verb in the simile. *Those kings entered the assembly place as great lions enter a mountain.*

तत्रासनेषु विविधेष्वासीनाः पृथिवीक्षितः।
सुरभिस्रग्धराः सर्वे प्रमृष्टमणिकुण्डलाः॥५-४॥
तत्र स्म पीना दृश्यन्ते बाहवः परिघोपमाः।
आकारवन्तः सुश्लक्ष्णाः पञ्चशीर्षा इवोरगाः॥५-५॥
सुकेशान्तानि चारूणि सुनासाक्षिभ्रुवाणि च
मुखानि राज्ञां शोभन्ते नक्षत्राणि यथा दिवि॥५-६॥

आकारवत् - well-formed; handsome (आकार *form; figure; stature*-वत्)
आसीन - sitting; seated
चारु - agreeable; pleasing; beautiful
द्यु - *m. or f.* heaven; the sky; day
नक्षत्र - *n.* a star or any heavenly body
पञ्चशीर्ष - five-headed (पञ्च *five*-शीर्ष *head*)
परिघोपम - resembling an iron beam (परिघ *iron beam*-उपम *resembling*)
पीन - swelling; full; thick; fleshy
पृथिवीक्षित् - *m.* king (पृथिवी-क्षित् *ruler*)
प्रमृष्टमणिकुण्डल - possessing bright-gem earrings (प्रमृष्ट *polished*-मणि *gem*-कुण्डल *ring; earring*)
मुख - *n.* face; countenance
विविध - of various sorts
√शुभ् - to beautify; *Ā.* to shine; to look beautiful or splendid
सुकेशान्त - having beautiful locks of hair (सु *good*-केशान्त *long hanging hair*)
सुनासाक्षिभ्रुव - having a beautiful nose and eyes and brows (सु *good*-नास *nose*-अक्षि *eye*-भ्रू *brow*)
सुरभिस्रग्धर - wearing fragrant garlands (सु *well*-रभि *fragrant*-स्रग् *garland*-धर *wearing*)
सुश्लक्ष्ण - very smooth or tender (सु *well*-श्लक्ष्ण *smooth*)

तत्रासनेषु विविधेष्वासीनाः - Uf. तत्र आसनेषु विविधेषु आसीनाः
पृथिवीक्षितः - nom. pl. of पृथिवीक्षित्
दृश्यन्ते - 3p passive of √दृश्. *There could be seen...*
पञ्चशीर्षा इवोरगाः - Uf. पञ्चशीर्षा इव उरगाः. Arms are compared to five-headed serpents because of the hand's five fingers.
सुकेशान्तानि चारूणि सुनासाक्षिभ्रुवाणि च - All n. nom. p. adjectives in agreement with मुखानि on the next line.
शोभन्ते - 3p Ā. of √शुभ्
नक्षत्राणि यथा - Postpositive यथा. *Like stars...*
दिवि - loc. s. of द्यु

दमयन्ती ततो रङ्गं प्रविवेश शुभानना।
मुष्णन्ती प्रभया राज्ञां चक्षूंषि च मनांसि च॥५-७॥
तस्या गात्रेषु पतिता तेषां दृष्टिर्महात्मनाम्।
तत्र तत्रैव सक्ताभून्न चचाल च पश्यताम्॥५-८॥
ततः संकीर्त्यमानेषु राज्ञां नामसु भारत।
ददर्श भैमी पुरुषान्पञ्च तुल्याकृतीनिव॥५-९॥

गात्र - *n.* “instrument of moving”; limb or body member
चक्षुस् - *n.* light; clarity; faculty of seeing
√चल् - to move on or forward; to stir
तुल्याकृति - alike in form (तुल्य *equal*-आकृति *form*)
दृष्टि - *f.* seeing; viewing; sight
√पत् - to fall
√मुष् - to steal; plunder; ravish; capture
शुभानन - good-looking (शुभ *splendid*-आनन *face*)
सं-√कीर्तय - to announce (denom. of कीर्ति *mention*)
√सञ्ज् - to cling

प्रविवेश - 3s perf. of प्र-√विश्
मुष्णन्ती - f. nom. participle of √मुष्. Used figuratively: ...*stealing the sight and minds of the kings.*
प्रभया - inst. s. of प्रभा
चक्षूंषि च मनांसि च - n. acc. plurals. of चक्षूस् and मनस् respectively.
पतित - PPP of √पत्
सक्ताभून्न - Uf. सक्ता अभूत् न. सक्त - PPP of √सञ्ज्. अभूत् - 3s aorist of √भू.
चचाल - 3s perf. of √चल्. The subject of this verb and the last is दृष्टिः
पश्यताम् - m. gen. pl. participle of √दृश्. Agrees with तेषां.
संकीर्त्यमानेषु राज्ञां नामसु - Loc. absolute. संकीर्त्यमानेषु - m. loc. pl. Ā. participle of सं-√कीर्तय.
नामसु - loc. pl. of नामन्. *As the names of the kings were being announced...*
ददर्श - 3s perf. of √दृश्

तान्समीक्ष्य ततः सर्वान्निर्विशेषाकृतीन्स्थितान्।
संदेहादथ वैदर्भी नाभ्यजानान्नलं नृपम्।॥५-१०॥
यं यं हि ददृशे तेषां तं तं मेने नलं नृपम्।
सा चिन्तयन्ती बुद्ध्याथ तर्कयामास भामिनी॥५-११॥
कथं नु देवाञ्जानीयां कथं विद्यां नलं नृपम्॥५-१२॥

अभि-√ज्ञा - to recognize
√तर्क् - to think over; to reflect
निर्विशेषाकृति - whose forms are precisely alike (निर् *no*-विशेष *distinction*-आकृति *form*)
√बुध् - to wake; be awake; observe; perceive
भाविनी - *f.* a noble of beautiful woman
संदेह - *m.* doubt; uncertainty

समीक्ष्य - Gerund of सम्-√ईक्ष्
सर्वान्निर्विशेषाकृतीन्स्थितान् - Uf. सर्वान् निर्विशेषाकृतीन् स्थितान्. *All standing without distinction*; ie. completely identical.
संदेहादथ - Uf. संदेहात् अथ. संदेहात् - abl. s. of संदेह
नाभ्यजानान्नलं - Uf. न अभ्यजानात् नलम्. अभ्यजानात् - 3s imp. of अभि-√ज्ञा
यं यं हि - Reduplicated correlative. Read as *whomever...*
ददृशे - 3s. Ā. perf. of √दृश्
मेने - 3s. perf. of √मन्
चिन्तयन्ती - f. nom. s. participle of √चित्
बुद्ध्याथ - Uf. बुद्ध्या अथ. बुद्ध्या - gerund of √बुध्
तर्कयामास - 3s periphrastic perf. of √तर्क्
जानीयाम - 1s optative of √ज्ञा
विद्यां - 1s optative of √विद्

एवं संचिन्तयन्ती सा वैदर्भी भृशदुःखिता।
श्रुतानि देवलिङ्गानि चिन्तयामास भारत॥३-५४-१३॥
देवानां यानि लिङ्गानि स्थविरेभ्यः श्रुतानि मे।
तानीह तिष्ठतां भूमावेकस्यापि न लक्षये॥३-५४-१४॥
सा विनिश्चित्य बहुधा विचार्य च पुनः पुनः।
शरणं प्रति देवानां प्राप्तकालममन्यत॥३-५४-१५॥

देवलिङ्ग - *n.* image or statue of a deity (देव-लिङ्ग *sign*)
प्राप्तकाल - *m.* suitable time; proper season; (प्राप्त *arrived*-काल *time*)
बहुधा - *ind.* in many ways, parts, forms, directions; variously; manifoldly (बहु *many*-धा *fold*)
भूमि - *f.* earth; soil; ground
भृशदुःखित - very afflicted; very unfortunate or unhappy (भृश *strongly*-दुःखित *distressed*)
वि-निश्-√चि - to deliberate (only in gerund form -चित्य)
शरण - *n.* refuge; protection
सं-√चिन्त् - to think over; to consider carefully; to reflect on (+acc.)

संचिन्तयन्ती - f. nom. s. participle of सं-√चिन्त्
श्रुतानि - n. acc. pl. PPP of √श्रु. Agrees with देवलिङ्गानि.
चिन्तयामास - 3s periphrastic perfect of √चिन्त्
देवानां यानि लिङ्गानि स्थविरेभ्यः श्रुतानि मे - Lit. *The marks of the gods heard by me from old men...*
तानीह तिष्ठतां भूमावेकस्यापि न लक्षये - Uf. तानि इह तिष्ठताम् भूमौ एकस्य अपि न लक्षये. तिष्ठताम् - n. gen. pl. of √स्था. भूमौ - loc. s. of भूमि. लक्षये - 1s Ā. of √लक्ष्
विचार्य - Gerund of वि-√चर्
शरणं प्रति - Postpositive प्रति.
अमन्यत - 3s imp. of √मन्

वाचा च मनसा चैव नमस्कारं प्रयुज्य सा।
देवेभ्यः प्राञ्जलिर्भूत्वा वेपमानेदमब्रवीत्॥५-१६॥
हंसानां वचनं श्रुत्वा यथा मे नैषधो वृतः।
पतित्वे तेन सत्येन देवास्तं प्रदिशन्तु मे॥५-१७॥
वाचा च मनसा चैव यथा नाभिचराम्यहम्।
तेन सत्येन विबुधास्तमेव प्रदिशन्तु मे॥५-१८॥

अभि-√चर् - to act wrongly; be unfaithful
नमस्कार - the exclamation “namas”; adoration; homage (नमस्-कार *making*)
प्र-√दिश् - to point out; indicate
प्र-√युज् - to apply; use; utter (words)

वाचा - inst. s. of वाच
प्राञ्जलिर्भूत्वा - प्राञ्जलिः is here a predicate adjective with भूत्वा.
वेपमानेदमब्रवीत् - Uf. वेपमाना इदम् अब्रवीत्. वेपमाना - f. nom. s. Ā. participle of √विप्
यथा मे नैषधो वृतः - वृत - PPP of √वृ. *As [surely as] Nala was chosen by me...*
पतित्वे - *In marriage*; goes with वृतः in the previous line.
तेन सत्येन - *By this truth...*
देवास्तं - Uf. देवाः तम्. तम् = Nala.
प्रदिशन्तु - 3p optative of प्र-√दिश्
नाभिचराम्यहम् - Uf. न अभिचरामि अहम्

यथा देवैः स मे भर्ता विहितो निषधाधिपः।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे॥५-१९॥
यथेदं व्रतमारब्धं नलस्याराधने मया।
तेन सत्येन मे देवास्तमेव प्रदिशन्तु मे॥५-२०॥
स्वं चैव रूपं कुर्वन्तु लोकपाला महेश्वराः
यथहमभिजानीयं पुण्यश्लोकं नराधिपम्॥५-२१॥

आराधन - *n.* homage; adoration
नराधिप - "lord of men"; king; prince (नर-अधिप *lord*)
निषधाधिप - "lord of Nishada"; Nala (निषध-अधिप)
पुण्यश्लोक - "well spoken-of"; praiseworthy in poetry (पुण्य *fair; auspicious*-श्लोक *glory; stanza*)
व्रत - *n.* vow; ordinance

विहित - Irregular PPP of वि-√धा
कुर्वन्तु - 3p imperative of √कृ
व्रतमारब्धं - Uf. व्रतम् आरब्धम्. आरब्ध - PPP of आ-√रभ्
स्वं चैव रूपं - Emphatically: *their own forms*, in contrast to that of Nala.
यथहमभिजानीयं - *So that I may recognize...* अभिजानीयम् - 1s optative of अभि-√ज्ञा

निशम्य दमयन्त्यास्तत्करुणं परिदेवितम्।
यथोक्तं चक्रिरे देवाः सामर्थ्यं लिङ्गधारणे॥५-२२॥
सापश्यद्विबुधान्सर्वानस्वेदान्स्तब्धलोचनान्।
हृषितस्रग्रजोहीनान्स्थितानस्पृशतः क्षितिम्॥५-२३॥
छायाद्वितीयो म्लानस्रग्रजःस्वेदसमन्वितः।
भूमिष्ठो नैषधश्चैव निमेषेण च सूचितः॥५-२४॥

अस्पृशत् - not touching (अ-स्पृशत् *touching*)
अस्वेद - not sweating (अ-स्वेद *sweating*)
करुण - mournful; miserable
क्षिति - *f.* the earth; soil of the earth; the ground
छायाद्वितीय - accompanied by one's shadow; casting a shadow (छाया *shadow*-द्वितीय *second; companion*)
निमेष - *m.* shutting the eye; winking
नि-√शम् - to observe; hear; perceive
निश्चय - *m.* conviction; certainty
परिदेवित - *n.* wailing; lamentation
भूमिष्ठ - standing or remaining on the ground (भूमि *ground*-ष्ठ *standing*)
म्लानस्रज् - having a withered or faded garland (म्लान *faded*-स्रज् *garland*)
रजस् - *n.* vapor; dirt; impurity
लिङ्गधारण - *n.* distinctive mark (लिङ्ग *mark*-धारण *bearing*)
समन्वित - accompanied with; endowed with; filled with
सामर्थ्य - *n.* power; strength; force
सूचित - pointed out; shown; made known by (inst. or comp)
स्तब्धलोचन - having unwinking eyes (said of the gods) (स्तब्ध *firmly fixed*-लोचन *eye*)
स्वेद - *m.* sweat
हृषितस्रग्रजोहीन - having unwithered garlands and free from dust (हृषित *joyous; fresh*-स्रज् *wreath*-रजस् *dust*-हीन *free from*)

निशम्य - Gerund of नि-√शम्
यथोक्तं - Uf. यथा उक्तम्
चक्रिरे - 3p Ā. perf. of √कृ
सापश्यद्विबुधान्सर्वानस्वेदान्स्तब्धलोचनान् - Uf. सा अपश्यत् विबुधान् सर्वान् अस्वेदान् स्तब्धलोचनान्. अपश्यत् - 3s imp. of √दृश्.
हृषितस्रग्रजोहीनान्स्थितानस्पृशतः - Uf. हृषितस्रग्रजोहीनान् स्थितान् अस्पृशतः. अस्पृशतः takes the following acc. क्षितिम् as its direct object.
म्लानस्रग्रजःस्वेदसमन्वितः - Uf. म्लानस्रज् रजःस्वेदसमन्वितः. रजःस्वेद are in instrumental relation with समन्वितः.
भूमिष्ठो नैषधश्चैव निमेषेण च सूचितः - *And the Naishadan, standing on the ground, was recognizable by his winking.* The "unwinking eyes" of the gods as described above are Vedic characterizations of the gods that "neither slumber nor sleep." Other anthropomorphic descriptions of the gods follow.

सा समीक्ष्य तु तान्देवान्पुण्यश्लोकं च भारत।
नैषधं वरयामास भैमी धर्मेण वस्त्रान्त॥५-२५॥
विलज्जमाना वस्त्रान्ते जग्राहायतलोचना।
स्कन्धदेशे ऽसृजत्तस्य स्रजं परमशोभनाम्॥५-२६॥
वरयामास चैवैनं पतित्वे वरवर्णिनी।
ततो हा हेति सहसा शब्दो मुक्तो नराधिपैः॥५-२७॥

परमशोभन - exceedingly beautiful (परम *utmost*-शोभन-*splendid*)
√मुच् - to send forth; to emit; to utter; to discharge
वस्त्रान्त - *m.* the end or hem of a garment
वि-√लज्ज् - to be ashamed; to blush
शब्द - *m.* sound; noise; note
सहसा - *ind.* At once.
√सृज् - to let loose from the hand; to hurl; to create
स्कन्धदेश - *m.* the region of the shoulders (स्कन्ध *shoulder*-देश *region*)

समीक्ष्य - Gerund of सम्-√ईक्ष्. *Having noticed...*
वरयामास - 3s causative periphrastic perfect of √वृ - *to choose*.
विलज्जमाना - f. nom. s. Ā. participle of वि-√लज्ज्
जग्राह - 3s perf. of √ग्रह्
आयतलोचना - Agrees with भैमी
असृजत् - 3s imp. of √सृज्
परमशोभनाम् - Agrees with स्रजं, here feminine.
चैवैनं - Uf. च एव एनम्. एनम् = Nala.
पतित्वे - *In marriage*; goes with वरयामास.
वरवर्णिनी - f. nom. s. वरवर्णिन्. Damayanti.
मुक्त - PPP of √मुच्. *...was uttered...*
नराधिपैः - Agent of मुक्त

देवैर्महर्षिभिश्चैव साधु साध्विति भारत।
विस्मितैरीरितः शब्दः प्रशंसद्भिर्नलं नृपम्॥५-२८॥
दमयन्तीं तु कौरव्य वीरसेनसुतो नृपः।
आश्वासयद्वरारोहां प्रहृष्टेनान्तरात्मना॥५-२९॥
यत्त्वं भजसि कल्याणि पुमांसं देवसंनिधौ।
तस्मान्मां विद्धि भर्तारमेवं ते वचने रतम्॥५-३०॥

अन्तरात्मन् - *m.* the soul; inner feelings; heart and mind
आ-√श्वस् - to breath freely; to take courage
ईरित - said; uttered
कौरव्य - *m.* descendent of Kuru
तस्मात् - from that; therefore (correlative with यद्)
प्र-√हृष् - to rejoice
महर्षि - *m.* great Rishi; great sage or saint (मह-ऋषि)
रत - delighting in (+loc., inst., or comp.; PPP of √रम्)
वरारोह - having fine hips (वर-आरोह *hip*)
साधु - *ind.* Bravo! (exclamation)

देवैर्महर्षिभिश्चैव - Instrumental agents. *And by the gods and great sages...*
विस्मितैरीरितः - Uf. विस्मितैः ईरितः. विस्मितैः agrees with देवैर्महर्षिभिश्चै. Parallel construction to the kings' exclamation, line 27.
प्रशंसद्भिः - M. inst. pl. of प्र-√शंस्. Agrees with देवैर्महर्षिभिश्चैव. *...praising King Nala.*
कौरव्य - Voc. Yudhishthira.
वीरसेनसुतो नृपः - Nala.
आश्वासयद्वरारोहां - Uf. आश्वासयत् वरारोहाम्. आश्वासयत् - 3s causative imperfect of आ-√श्वस्
प्रहृष्टेनान्तरात्मना - Uf. प्रहृष्टेन आन्तरात्मना. प्रहृष्ट - PPP of प्र-√हृष्. *With a joyful mind...*
यत्त्वं भजसि कल्याणि - यद् is used to mean *since* and correlates with तस्मात्. *Since, beautiful lady, you fancy...*
पुमांसं - Irregular acc. s. of पुंस्
देवसंनिधौ - Compound देव-संनिध *...in the presence of the gods...*
विद्धि - 2s imp. of √विद्
भर्तारम् - Predicate adjective. *Know me as your husband...*
एवं ते वचने रतम् - Predicate adjective phrase. *...delighting in your words.*

यावच्च मे धरिष्यन्ति प्राणा देहे शुचिस्मिते।
तावत्त्वयि भविष्यामि सत्यमेतद्ब्रवीमि ते॥५-३१॥
दमयन्तीं तथा वाग्भिरभिनन्द्या कृताञ्जलिः॥५-३२॥
तौ परस्परतः प्रीतौ दृष्ट्वा त्वग्निपुरोगमान्।
तानेव शरणं देवाञ्जग्मतुर्मनसा तदा॥५-३३॥

अग्निपुरोगम - having Agni as a leader (अग्नि-पुरोगम *going before*)
अभि-√नन्द् - to please; to gladden
तावत् - so much; so long; to such an extent (coordinates with यावत्)
देह - *m.* the body
परस्परतस् - *ind.* mutually; with each other
प्राण - *m.* breath of life; breath; vitality
√प्री - to be pleased or satisfied
यावत् - as long as; until

यावच्च - Uf. यावत् च
धरिष्यन्ति - 3p future of √धृ. Here takes the meaning of *to sustain*.
देहे - Loc. object of धरिष्यन्ति.
शुचिस्मिते - Voc. Damayanti.
तावत्त्वयि भविष्यामि - *For that long I will be yours.* The caesura afterwards begins a new clause.
वाग्भिः - Inst. pl. of वाच्
अभिनन्द्य - Gerund of अभि-√नन्द्. Another line containing a principle verb with Nala as subject seems lacking.
प्रीतौ - nom. dual PPP of √प्री
त्वग्निपुतोगमान् - Uf. तु अग्नि-...
जग्मतुः - 3p perf. of √गम्.
तानेव शरणं देवाञ्जग्मतुर्मनसा - *Went to those gods as a refuge with their minds,* ie, perceived that the gods had been good to them.

वृते तु नैषधे भैम्या लोकपाला महौजसः।
प्रहृष्टमनसः सर्वे नलायाष्टौ वरान्ददुः॥५-३४॥
प्रत्यक्षदर्शनं यज्ञे गतिं चानुत्तमां शुभाम्।
नैषधाय ददौ शक्रः प्रीयमाणः शचीपतिः॥५-३५॥
अग्निरात्मभवं प्रादाद्यत्र वाञ्छति नैषधः।
लोकानात्मप्रभांश्चैव ददौ तस्मै हुताशनः॥५-३६॥

अनुत्तम - unsurpassed; incomparable (अन्-उत्तम)
अष्ट - eight
आत्मप्रभ - shining by one's own light (आत्म-प्रभा *illuminated*)
आत्मभव - *m.* one's own presence
प्रत्यक्षदर्शन - *n.* seeing with one's own eyes; power of discerning (the presence of a god)
प्र-√दा - to bestow
प्रहृष्टमनस् - cheerful at mind (प्रहृष्ट *cheered*-मनस् *mind*)
महौजस् - very vigorous or mighty
यज्ञ - *m.* worship; devotion; prayer; praise
√वाञ्छ् - to wish for; to desire
शचीपति - *m.* Saci's husband; lord of might or help (Indra) (शची *help*-पति)
हुताशन - *m.* "oblation-eater" (epithet of Agni); fire (हुत *oblation*-अशन *eating*)

वृते तु वैषधे भैम्या - Loc. absolute phrase. *When the Naishadan was chosen by Bhima's daughter...*
नलायाष्टौ वरान्ददुः - Uf. नलाय अष्टौ वरान् ददुः. अष्टौ - irregular nom/voc/acc. pl. of अष्ट. ददुः - 3pl perf. of √दा. The four gods give two gifts each, in addition to a common gift. It is by exercise of the supernatural powers now given to Nala that Damayanti will recognize her lost and transformed husband in chapter 23.
गतिं चानुत्तमां शुभाम् - Uf. गतिम् च अनुत्तमाम् शुभाम्. *And a splendid incomparable gait...* This includes the ability to pass through a low doorway without stooping, one of the powers by which Damayanti will recognize Nala.
ददौ - 3s perf. of √दा.
प्रीयमाण - m. s. Ā. participle of √प्री
प्रादाद्यत्र - Uf. प्रादात् यत्र. प्रादात् - 3s imp. of प्र-√दा.
वाञ्छति - 3s of वाञ्छति. Subject नैषधः. Dependent clause with यत्र - *...wherever the Nishadhan might wish.*

यमस्त्वन्नरसं प्रादाद्धर्मे च परमां स्थितिम्।
अपांपतिरपां भावं यत्र वाञ्छति नैषधः॥५-३७॥
स्रजश्चोत्तमगन्धाढ्यां सर्वे च मिथुनं ददुः।
वरानेवं प्रदायास्य देवास्ते त्रिदिवं गताः॥५-३८॥
पार्थिवाश्चानुभूयास्या विवाहं विस्मयान्विताः।
दमयन्त्याः प्रमुदिताः प्रतिजग्मुर्यथागतम्॥५-३९॥

अन्नरस - *m.* taste in distinguishing food (अन्न *food*-रस *nectar*)
अपाम्पति - ocean-lord (epithet of Varuna) (अपाम् *waters*-पति)
उत्तमगन्धाढ्य - possessing the most delicate scent (उत्तम-गन्धाढ्य *fragrant*)
त्रिदिव - *n.* the third or most sacred heaven
प्रति-√गम् - to return home
प्रमुदित - delighted; pleased; glad
मिथुन - double; forming a pair
यथागतम् - *ind.* back the way one came
विवाह - *m.* leading away; taking a wife; marriage

यमस्त्वन्नरसं - Uf. यमः तु अन्नरसम्. It is eventually by this subtle taste in food, with the other powers, that Damayanti will recognize Nala.
प्रादाद्धर्मे - Uf. प्रादात् धर्मे
धर्मे च परमां स्थितिम् - *...and eminence in virtue.* स्थितिम् is used nominally to mean "standing."
अपांपतिरपां भावं यत्र वाञ्छति नैषधः - Missing a verb: प्रादात् to be inferred from context.
अपांपतिः - Refers to Varuna. अपां - gen. pl. of अप्. *The lord of the waters gave the waters' presence wherever the Nishadhan might wish...*
स्रजश्चोत्तमगन्धाढ्यां - Uf. स्रजः च उत्तमगन्धाढ्यां.
सर्वे च मिथुनं ददुः - The caesura begins a new clause. *Each gave his double [blessing.]*
प्रदायास्य - Uf. प्रदाय अस्य. प्रदाय - gerund of प्र-√दा. अस्य - gen. s. of अयम्
अनुभूयास्या - Gerund of अनु-√भू. Construe from this sentence अनुभूयास्य विवाहं अस्य दमयन्त्यास्च. *Learning of his and Damayanti's wedding...*
प्रतिजग्मुः - 3p perf. of प्रति-√गम्

गतेषु पार्थिवेन्द्रेषु भीमः प्रीतो महामनाः।
विवाहं कारयामास दमयन्या नलस्य च॥५-४०॥
उष्य तत्र यथाकामं नैषधो द्विपदां वरः।
भीमेन समनुज्ञातो जगाम नगरं स्वकम्॥५-४१॥
अतीव मुदितो राजा भ्राजमानों ऽशुमानिव।
अरञ्जयत्प्रजा वीरो धर्मेण परिपालयन्॥५-४२॥

अंशुमत् - radiant (अंशु *ray; beam*-मत्)
द्विपद् - two-footed; *m.* man
नगर - *n.* town; city
परि-√पालय - to protect around (denom. of पाल *protector*)
पार्थिवेन्द्र - most excellent of kings (पार्थिव-इन्द्र)
प्रजा - *f.* subjects (of a prince)
मुदित - delighted
